GITASUNDARAM

015.1
N27
12368

RSVL
12368

666

GITASUNDARAM

BY

SADASIVA DIKSHITA



2

SRIRANGAM

SRI VANI VILAS PRESS

12368

॥ श्रीः ॥

॥ गीतसुन्दरम् ॥


तञ्जापुरच्छत्रपतिश्रीतुलजामहाराजस्य
आस्थानविद्वच्छिरोमणिभूतस्य
श्रीचोक्कनाथदीक्षितस्य शिष्येण

सदाशिवदीक्षितेन

विरचितम् ।

सर्गाः— ४— ६

श्रीरङ्गम्
श्रीवाणीविलासमुद्रायन्त्रालये
संमुद्रितम् ॥
१९२७.



॥ श्रीः ॥

॥ शिवाभ्यां नमः ॥

॥ गीतसुन्दरम् ॥

चतुर्थः सर्गः ॥

अचिरमभिसर त्वं प्रीणय प्राणकान्तां
त्वदधरमधुलोला कातरा सा वियोगे ।
चलितुमनवकाशा मुद्रिता मोहकोशे
गणितरजनिशेषा भृङ्गयोषेव खिन्ना ॥ १ ॥

अपि चिरयसि चेत्त्वं भावजं वा रुजं वा
परिहर परमेश प्राणितुं प्रेयसी ते ।

परिचयसरसानां सा सखीनां वियोगेऽ-
प्यनुकलयति तापं किं पुनः प्राणबन्धोः ॥ २ ॥

अद्यैव हन्त कुसुमायुधजैत्रयात्रा
विस्तारिता पटकुटी मकराङ्कितेव ।
आलोकभीतसकलारिकला दशाभि-
राबद्धरश्मिरुदिता हरिणाङ्कमूर्तिः ॥ ३ ॥

तपति तनुं हिमभानौ
विरहकृशानौ च दहति बहुभीता ।
अविरलितवाष्पपूरं
शोकमधीरं वितेने सा ॥ ४ ॥

त्रयोदशाष्टपदी ।

आहरिरागेण गीयते । झम्पातालः ।

किं करोमि कथं सहे
विफलितकठोरजीविताहम् ॥ [ध्रुवम्]

अतिपरुषकामशरमनुसरति हिमकरे ।
रतिकुतुकमपरासु नयति शितिकन्धरे ॥ १ ॥
[किं करोमि]

अपि तमसि मम वसतिरिव विपिनकौमुदी ।
गिरिशमतिरिव बहुलकुसुमवनषट्पदी ॥ २ ॥
[किं करोमि]

अनुशोच्य बहु खेदयति चक्रवाकी ।
नीलकण्ठतयेव नटति केकी ॥ ३ ॥ [किं करोमि]

तनुमिव हि शोषयति भूषणकदम्बम् ।
कलयति च परवशे गिरिशे विडम्बम् ॥ ४ ॥
[किं करोमि]

सुरलोकवनिताभिरपि यदनुयातम् ।
भावि शल्यं तदिह मम हृदि निखातम् ॥ ५ ॥
[किं करोमि]

अतिविरहिवपुरिदं किमिति धृतचेतनम् ।
अनुभविष्यति किं नु विमुख वृषकेतनम् ॥ ६ ॥
[किं करोमि]

अनुचलितचन्द्रकलमनुवलितकन्धरम् ।
स्फुरति मम मानसं स्फुरितमधुराधरम् ॥ ७ ॥
[किं करोमि]

मदनशशिमलयगिरिपवनवैरस्यम् ।
जित्वा कदा यामि नव्यहालाख्यम् ॥ ८ ॥ [किं करोमि]

इति त्रयोदशाष्टपदी ।

देवः पुष्पवने विलासरसिकः किं हेमनाथारतः
किं वा सारतरेण भद्रवनितागानेन संमोहितः ।
यद्वा वैश्यसुताकरग्रहसुखान्नेष्टे निवृत्त्यै कुतः
सारज्ञः प्रणयी युवा समरसोऽप्यद्यापि नैवागतः ॥ ५ ॥

अथानुनेतुं शशिखण्डचूडं
चिरादलब्धावसरामुपेताम् ।
सखीं विलोक्य प्रियमन्यकान्ता-
वशीकृतं दुष्टमिवाह गौरी ॥ ६ ॥

चतुर्दशाष्टपदी ।

सारङ्गरागेण गीयते । मिश्रछाप् तालः ।

कापि नवललिता वशयति शिवमङ्गजपालिता ॥
[ध्रुवम्]

मदनमदोदितवदनविकासा ।
रतिसुखलालसनयनविलासा ॥ १ ॥ [कापि नव]

दरहसितस्फुरिताधरबिम्बा ।
तरुणिममदमत्तविततनितम्बा ॥ २ ॥ [कापि नव]

सरभसपरिरम्भगुम्फितपुलका ।
चिरपरिशीलितनखदन्तकलिका ॥ ३ ॥ [कापि नव]

सकुतुकसमरसकेलिकलापा ।
कुचकुम्भकौसुम्भकलितविलेपा ॥ ४ ॥ [कापि नव]

नवमदनाहवसंभृतलीला ।
मणिकुण्डलबिम्बचुम्बिकपोला ॥ ५ ॥ [कापि नव]

काञ्चीमणिरणितोचितमणिता ।
स्मरसमरोद्धतनटनविवलिता ॥ ६ ॥ [कापि नव]

चलदलकाहतकर्णशिरीषा ।
दरमीलितेक्षणदर्शिततोषा ॥ ७ ॥ [कापि नव]

प्राणप्रियासीति कथितमनोज्ञा ।
हालास्यपुरवासरचितप्रतिज्ञा ॥ ८ ॥ [कापि नव]

इति चतुर्दशाष्टपदी ।

कान्तः कन्दुकखेलदङ्घ्रिकमलन्यस्तनृत्तक्रमै-
रागः स्वीयमपाकरिष्णुरपि हा तिष्ठेत मह्यं कदा ।
औत्सुक्यादनुरञ्जनादनुपदस्पर्शादनुप्राप्य मा-
माश्लिष्येदनुलालयेदनुवदेदानन्दयेद्वा कदा ॥ ७ ॥

मन्दो निन्दतु चन्दनाचलमरुद्व्यालीव केलीशुकी
कान्तोऽरुन्तुदवाचमुच्चरतु हा कामोऽपि भीमायताम् ।
किं वक्ष्यामि कथं कठोरविरहे संतप्तया यन्मया
शीतांशुर्मम जन्मवंशगुरुरप्यद्यैव वैरायते ॥ ८ ॥

अत्रान्तरे पुष्पवनाभिसारे
सौन्दर्यमन्यादृशमावहन्तीम् ।
कैवर्तकन्यां चकमे पुरारि-
रित्थं सखी प्राह सुमीननेत्राम् ॥ ९ ॥

पञ्चदशाष्टपदी ।

मुखारिरागेण गीयते । मिश्रछाप् ताल: ।

यतते कुसुमायुधसमरे
मधुरसुधांशुरधुना ॥ (ध्रुवम्)

जितमणिमुकुरे स्मितपुररुचिरे कामिनीगण्डतले ।
घटयति वदनं सविलासमदनं विधुमिव सुधामण्डले ॥
(यतते)

श्रितमुखरचने रमणीरशने शुकतुण्डशिखरोपमे ।
नवनवमधुरं जितबिम्बमधरं वितरति रतिसंभ्रमे ॥२॥
(यतते)

परिचयपृथुले गुरुकुचयुगले मञ्जुलमकरीदले ।
सृजति विशङ्कं खरसनखाङ्कं मणिमिव कनकाचले ॥३॥
(यतते)

रतिगतिचतुरे रशनामुखरे खेलति पृथुजघने ।
परिचितनलिने यमुनापुलिने हरिरिव रुचिरघने ॥ ४ ॥
(यतते)

चिकुरविभागं नयति सरागं लावण्यपूरपथम् ।
विलसदकुटिलं सिन्दूरपटलं रविमिव तिमिरावृतम् ॥
(यतते)

स्मरचापतरले भ्रुकुटीयुगले लोचनगुणरञ्जिते ।
भ्रितफालफलकं मृगमदतिलकं शरमिव कामयते ॥
[यतते]

कुचगिरिवहने कचभरनहने मदयति बहु मोदते ।
गायति गीतं रतिसुखजातं नृत्यति विवशायते ॥ ७ ॥
[यतते]

उपवनसविधे प्रतिकलविविधे चुम्बनबन्धशते ।
तरलितचिकुरे तरुणीनिकरे हालास्यपती राजते ॥ ८ ॥
[यतते]

इति पञ्चदशाष्टपदी ।

काञ्चीचञ्चलकिंकिणीकलरवैः कर्णामृतं कल्पये-
द्वेणीसौरभसंपदा सहजया घ्राणेप्सितं पूरयेत् ।
भाग्यानामधिदेवता नयनयोः सैवोपलभ्येत वे-
त्याशास्ते स विशङ्कते विवलते त्वां वीक्षते शंकरः ॥

आमोदो रतिकौशले बहुमतिः कन्दर्पसारस्वते
सौजन्यं मृदुभाषणे सखि कथं विस्मार्यते मायिना ।
स्थाने धूर्तशिखामणिः स रमते धन्यासु वन्यासु वा
यातायातदये समानहृदये चिन्ता दुरन्ता मम ॥ ११ ॥

षोडशाष्टपदी ।

पुन्नागबरालिरागेण गीयते । रूपकतालः ।

या सुखिता सखि शंभुना
या सुखिता । (ध्रुवम्)

मुकुटघटितशशधरशकलेन ।
न बिभेति सा नवहिमसलिलेन ॥ १ ॥ [या सुखिता]

मधुरसमधुरिमलसदधरेण ।
न जहाति सा मुदमलिनिकरेण ॥ २ ॥ [या सुखिता]

सहकारकिसलयमृदुलशयेन ।
न दुनोति सा हृदि मधुसमयेन ॥ ३ ॥ [या सुखिता]

दरहासविकसितमुखमधुरेण ।
न तनोति सा शुचमतनुशरेण ॥ ४ ॥ [या सुखिता]

मृगमदसुरभितवसनाञ्चलेन ।
न दधाति सा परिभवमनिलेन ॥ ५ ॥ [या सुखिता]

प्रतिकलनवनवशुभरचनेन ।
न तनोति सा रुजमपि विजनेन ॥ ६ ॥ [या सुखिता]

सललितसमरससुविहरणेन ।
न बिभर्ति सा रुषमुपचरणेन ॥ ७ ॥ [या सुखिता]

अनुरतहालास्यपुरनिलयेन ।
समुपैति सा नवमणिवलयेन ॥ ८ ॥ [या सुखिता]

इति षोडशाष्टपदी ।

इति श्रीमत्परमशिवातिवादिमूर्धन्यस्य सदाशिवदीक्षितस्य कृतिषु
चतुःषष्टिलीलासंग्रहे गीतसुन्दरे चतुर्थः सर्गः ॥



पञ्चमः सर्गः ॥

न किं ते दाक्षिण्यं पवन न किमामोदसमयः
प्रसीद प्राणोऽसि प्रणयिनमनुप्रापय मनाक् ।
श्वसन्तं हा हन्त ज्वलयसि मनोजाग्निमधुना।
जगत्प्राणस्येदं बत मलयबन्धो किमुचितम् ॥ १ ॥

किंचिच्चलापाङ्गनिदेशमात्रा-
लीलावतीनां कुशलं विधातुः ।
कन्दर्प कुत्रात्मभुवस्तवापि
संहारपारुष्यमिदं प्रसक्तम् ॥ २ ॥

निर्वेदसंकल्पविकल्पजालै-
र्नीत्वा कथंचिद्रजनीं प्रभाते ।
स्मरातुरापि प्रणमन्तमग्रे
नवागसं शंकरमाह गौरी ॥ ३ ॥

SANSKRIT VIDYA PEETHA LIBRARY
12368
R S V L
12368

आलिप्तं निटिले तव प्रियतमासीमन्तसिन्दूरकं
संक्रान्तो नयनाञ्चले नववधूकर्पूरवीटीरसः ।
इन्द्वे कज्जलकालिमा कलुषवद्बन्धूकशोणाधरे
लब्धं सर्वमभीष्टमाशु भवता धन्योऽसि मान्योऽसि मे ॥

सप्तदशाष्टपदी ।

मलहरिरागेण गीयते । आदितालः ।

साधु पुरहर साधु विषधर
साधितवानसि कामम् ।
तामुपलालय सोमकलाधर
या तव दिशति ललामम् ॥ [ध्रुवम्]

मृदुपदरञ्जितनवलाक्षारस-
संवलितं तव फालम् ।
उदयारुणरुचिरार्धविभासित-
विधिमनुसरति सलीलम् ॥ [साधु]

पृथुलपयोधरकुङ्कुमरसदृढ-
मुद्रितमुरसि समोहम् ।
कथयति वर्तुलमण्डलयुगलं
वरतनुकुचपरिणाहम् ॥ [साधु]

एककलावति भवति पुरा शिव
शेखरमात्रमुदारम् ।

बहुलनखेन्दुकलाभिरलंकृत-
मधुना लसति शरीरम् ॥ ३ ॥ [साधु]

रजनीजागरचुम्बनलालस
कोकनदाधिकशोणम् ।
लोचनयुगलं तव रतिसाहस-
मनुवदति स्मयमानम् ॥ ४ ॥ [साधु]

विद्रुममरकतमौक्तिकघटितं
कुङ्कुमपङ्किलहारम् ।
उरसि निधाय वृथा वचनैरपि
किरसि सुधारससारम् ॥ ५ ॥ [साधु]

नवनव बन्धविशेषविनोदित-
युवतिशतं तव गात्रम् ।
मृगमदकुङ्कुमरजनीकज्जल-
यावकविरचितचित्रम् ॥ ६ ॥ [साधु]

कैतवकौशलमपि तव विदितं
तामुपयाहि समौनम् ।
स्वादुसकतुगमितप्रणयामिव
न गणय मामपि नूनम् ॥ ७ ॥ [साधु]

तावकजनमपि तादृशसुखमपि
किमिति विहाय विषादम् ।

कलयसि हालास्याधिप मा कुरु
पुनरलसासु विवादम् ॥ ८ ॥ [साधु]

इति सप्तदशाष्टपदी ।

अङ्गं शृङ्गारतुङ्गं तरुणिमवितते रन्तरङ्गा अपाङ्गा
वक्त्रं शीतांशुमित्रं जयतु मधुकरश्रेणिका वेणिका ते ।
दक्षो वक्षोजभारः स्मरसमरसमारम्भसंभावनीयः
कान्ते क्लान्ते सखि त्वं कथमसि विमुखी मान्मथेऽपि प्रपञ्चे ॥

तदनु स्मृतविरहां तां विरसस्वान्तां विषादसंक्रान्ताम् ।
प्रकटितपशुपतिचरितामाली मलयध्वजां प्राह ॥ ९ ॥

अष्टादशाष्टपदी ॥

यरकलकाम्भोजिरागेण गीयते । आदितालः ।

सुन्दरं सोमसुन्दरम् ।
नन्दय सखि शरदिन्दुमुखम् ॥ [ध्रुवम्]

अयि शिवमनुनय संत्यज कोपम् ।
जनयसि सरसे किमु परितापम् ॥ १ ॥ [सुन्दरम्]

रुचिरतदङ्गुलिपरिचयपृथुलम् ।
सफलय सपदि पयोधरयुगलम् ॥ २ ॥ [सुन्दरम्]

तव मधुराधरमधुरिमरसिकम् ।
सकृदवलोकय समरसकुतुकम् ॥ ३ ॥ [सुन्दरम्]

विफलविचारविषादविदूना ।
सीदसि किमिति कलावति दीना ॥ ४ ॥ [सुन्दरम्]

प्रतिवदसि प्रियतममुपयातम् ।
तं घटयसि परयुवतीजातम् ॥ ५ ॥ [सुन्दरम्]

करगतममृतं विकिरसि बाले ।
अहह कुतूहलकुसुमितलीले ॥ ६ ॥ [सुन्दरम्]

अचिरमुपाश्रय कुवलयनयने ।
शंकरमभिनवकिसलयशयने ॥ ७ ॥ [सुन्दरम्]

सुगुणनिधे देवि कुरु मम वचनम् ।
स्मरहालास्याधिपरतिरसरचनम् ॥ ८ ॥ [सुन्दरम्]

इति अष्टादशाष्टपदी ।

प्राप्तश्च प्रार्थनीयः सुदति वदति च प्रेमसारानुसारं
वामे कामेषुभिन्नं वपुरतिमृदुलं पश्य पश्यालिकस्य ।
मानं मौनं च मा गाः सखि सुखय रतौ सत्वरा जित्वरा त्वं
रन्तुर्भर्तुर्वधूनामभिलषितसुखप्रापणः श्लाघनीयः ॥ ७ ॥

तस्मिन्दिनान्तसमये सहसा गिरीशो
दोषानुचिन्तनकषायितलोचनां ताम् ।
आरादुपेत्य विनयेन मुहुः श्वसन्तीं
सव्रीडनम्रवदनः स्वयमित्युवाच ॥ ८ ॥

एकोनविंशाष्टपदी ।

मुखारिरागेण गीयते । झम्पातालः ।

प्रिये मीननयने
विसृज मयि रोषमविचारम् ।
रहसि कृतदूषणं रमणि मम भूषणं
कलय परिरम्भमुपहारम् ॥ [ध्रुवम्]

प्रसरतु तव प्रणयसरसमवलोकनं
भजतु जगदमृतरससेकम् ।
वचनमपि सप्रेम यदि भवति तावकं
वशयामि मदनमतिलोकम् ॥ १ ॥ [प्रिये]

तरुणि तव लोचनं न कलय रुषारुणं
दलितकोकनददलसमानम् ।
विविधरतिसाहसैरधिरजनि जागरा-
दनुरागमनुवहतु नूनम् ॥ २ ॥ [प्रिये]

कलकण्ठि किमिति मयि दोषपरिगणनेन
मुखरयसि मुखकमलनालम् ।
स्मरसमरकाहलीकलकलविजृम्भितं
मणितमनुनय मधुरलीलम् ॥ ३ ॥ [प्रिये]

श्वसितपवनेन परिशीलयसि वेपथुं
विद्रुमलताङ्गि किमधीरम् ।

विषमरतिरभसेन कुचलिकुचताण्डवं
विरचति कलय तरलहारम् ॥ ४ ॥ [प्रिये]

प्रतिफलिततटङ्कमणिकिरणरञ्जितं
न तिरय करेण सुकपोलम् ।
घनसारवीटिकाकबलमातिसौरभं
देहि मम जितमधुरजालम् ॥ ५ ॥ [प्रिये]

ललितवलितग्रीवमुन्नमितवदनमयि
मयि किमनुचिन्तनमपारम् ।
रदनदरसंसर्गनिर्गलन्मधुरसं
वितर मधुराधरमुदारम् ॥ ६ ॥ [प्रिये]

गजदनुजकुम्भदृतमुक्ताफलोज्ज्वलं
मणिसरं गमय कुचभारम् ।
अनुयातु शशिकला तारकसमाजमिव
मम करजरेखानुवारम् ॥ ७ ॥ [प्रिये]

हंसकझलंझलितमुखरपदपङ्कजं
मम हृदि निधेहि सुकुमारम् ।
स्मरतापशमनाय वर्षतु सुधारसं
हालास्यकृतराज्यभारम् ॥ ८ ॥ [प्रिये]

इति एकोनविंशाष्टपदी

यदि च कुपितं चेतो हेतुं विनैव तव प्रिये
प्रहर परुषं वेण्या वाण्या विनिन्द रुषं त्यज ।

अहह दहति क्रूरो मारः प्रयुज्य शरान्बहू-
न्व्यथितवपुषं वामे भामे कथं समुपेक्षसे ॥ ९ ॥

दिशि मम दरस्मेरां दृष्टिं दिशेदवलोक्य मां
त्रिचतुरपदं प्रत्युद्गच्छेन्नितम्बभरालसा ।
उपगतमपि प्रेमावेशान्निगूहनचुम्बन-
प्रथमवचनैर्धन्यं कुर्यात्प्रिये भवती कदा ॥ १० ॥

अनुनयविनयाभ्यां प्रापयित्वा प्रसादं
गतवति मधुरेशे मञ्जु सङ्केतकुञ्जम् ।
तदनु शबरनेत्रां प्राप्य काचित्प्रदोषे
चतुरतरमवादीद्रत्नपेटीं दधाना ॥ ११ ॥

विंशाष्टपदी ।

कल्याणीरागेण गीयते । मिश्रछाप् तालः ।

कान्ते शशिमकुटमभिसर ।
कातरलोचने ॥ (ध्रुवम्)

तव हृदयानुसरणचतुरं रतिकौशलगरिमधुरीणम् ।
वेगवतीतटकुसुमितवञ्जुलकुञ्जे कृतमृदुगानम् ॥ १ ॥
(कान्ते)

नवमणिकाञ्चीकलरवबोधितशुककोकिलपरिवारम् ।
प्रतिपदमनुनय जघनस्तनभरविघ्नितगमनविचारम् ॥
(कान्ते)

अहमहमिकया नवनवकुसुममधूलीचलदलिगुञ्जे ।
नटति विलोकय नवपवनाहतमञ्जरिकानवकुञ्जे ॥ ३ ॥
(कान्ते)

कनकदुकूलचकच्चकितस्तनकलशयुगान्तरलग्नम् ।
मृदु परिवेलय मणिसरमुपकुरु करकमलेन वलग्नम् ॥
(कान्ते)

शङ्कितनवजलदागमतिमिरविलोकननटितमयूरम् ।
अयनमुपाश्रय विविधपरागभरालसमलयसमीरम् ॥५॥
(कान्ते)

नयनविलासविनिर्मितकुवलयमालिकयैव वनान्तम् ।
भूषय दरहसिताङ्कुर कुसुमैरुपसर सखि तव कान्तम् ॥
(कान्ते)

अवगतमेव सखीभिरुदाहर तव पतिसमरसभावम् ।
स्फुरदधरं मुहुरुपचितपुलकं न तिरय भवदनुभावम् ॥
(कान्ते)

अनतिविभूषणमखिलावयवं प्रियघटनाय तवाङ्गम् ।
कलय विलासिनि वशितानङ्गं हालास्याधिपसङ्गम् ॥८॥
(कान्ते)

इति विंशाष्टपदी ॥

इति श्रीमत्परमशिवातिवादिमूर्धन्यस्य सदाशिवदीक्षितस्य कृतिषु
चतुःषष्टिलीलासंग्रहे गीतसुन्दरे पञ्चमः सर्गः ॥



षष्ठः सर्गः ॥

रन्तुः पुष्पवतीं दिवा दिनमणेर्भूयः प्रदोषागमे
तामिस्रालिमिषादकीर्त्तिपटली व्याप्नोति सर्वा दिशः ।
किं चेहाभिसरद्वधूकचभरामोदप्रिया षट्पद-
श्रेणिर्नीलसरोजकाननधिया व्यग्रा परिक्रामति ॥ १ ॥

तनुप्रभाकल्पितचारुचिल्लकं
सलीलसंव्यानमिव स्तनान्तरे ।
निरन्तरायं परिरम्भसंभ्रमं
कलावतीनां तनुते चिरं तमः ॥ २ ॥

रत्नावलीधवलमेचकपाटलश्री-
शिक्षापकस्फुरदपाङ्गतरङ्गिताङ्गम् ।
आरादवेक्ष्य शिवमुज्ज्वलकेलिशय्या-
प्रत्यागतं नतमुखी निजगाद कापि ॥ ३ ॥

एकविंशाष्टपदी ॥

घण्टारागेण गीयते । झम्पातालः ।

पश्य ललिते शंकरविलासम् ।
पश्य ललिते ॥ (ध्रुवम्)

जलदरुचिवलभिदुपलाकरघने
विलस सखि विद्युदिव मीननयने ॥ १ ॥ (पश्य)

कनकमहिपरिलसितधातुनिकरे ।
इह निवस मणिरिव सुगन्धिचिकुरे ॥ २ ॥ (पश्य)

शशिकिरणविशदतटसौधनिकटे ।
इह भव चकोरीव चन्द्रमकुटे ॥ ३ ॥ (पश्य)

नलिनीदलारचितमृदुलशयने ।
इह चर मरालीव मन्दगमने ॥ ४ ॥ (पश्य)

वनपवनदरदलितसुमवितानें ।
इह निनद रतिरिव सुललितगाने ॥ ५ ॥ (पश्य)

कोमलतमालदलकृतकुटीरे ।
इह जय मयूरीव सुगुणहारे ॥ ६ ॥ (पश्य)

अतिरुचिरनवरत्नकुट्टिमपदे ।
इह विहर मञ्जीरशिञ्जितपदे ॥ ७ ॥ (पश्य)

अतिशयितहालास्यलसदुपवने ।
इह रमय शिवमवितसकलभुवने ॥ ८ ॥ (पश्य)

इति एकविंशाष्टपदी ॥

निसर्गकचसौरभप्रतिपदप्रतिष्ठापके
तव प्रियतमे सखि प्रसवचापतापाधिके ।
प्रमर्दितघनस्तनस्तवकलिप्तकस्तूरिका-
करम्बितकराम्बुजे न कलय प्रतीपं वृथा ॥ ४ ॥

आलीषु किल दाक्षिण्यात्केलीशुकसहायिनी ।
सानन्दमदना प्राप मीनाक्षी सुन्दरेश्वरम् ॥ २ ॥

द्वाविंशाष्टपदी ।

मध्यमावतीरागेण गीयते । आदितालः ।

मधुराधिपतिं परिचितसमरसभावम् ।
सा ननन्द समवेक्ष्य समाहितकुसुमशरासनभावम् ॥
(ध्रुवम्)

मीनाक्षी सविलाससमागमसमुदितबहुविधलीलम् ।
विमलकलानिधिमिव शरदुज्ज्वलराकारञ्जनशीलम् ॥
[मधुराधिपतिम्]

विशदमुरःस्थलमधिगतनवमणिरचितमनोहरभूषम् ।
अमृतपयोनिधिमध्यभागमिव समणिद्वीपविशेषम् ॥
[मधुराधिपतिम्]

गौरीकुचभरमनुकलयन्तं सरसकटाक्षविहारम् ।
कनकमहीधरशिखराञ्चितमिव पारिजातसुमहारम् ॥
[मधुराधिपतिम्]

कुङ्कुमरजसा गलनीलरुचिं विदधतमुपरि सुदूरम् ।
चलितकदम्बपरागविधूसरमिव मधुकरमनुवारम् ॥४॥
[मधुराधिपतिम्]

कलितकपोलविकासदरस्मितमनुरतमदकलगीतम् ।
प्रेमपूरमतिलङ्घितवेलं बहिरिव मुहुरनुयातम् ॥ ५ ॥
[मधुराधिपतिम्]

सितसुकुमारशरीरमुदञ्चितविद्रुमरागदुकूलम् ।
राजहंसमिव नवयावकरसरञ्जितपक्षविलोलम् ॥ ६ ॥
[मधुराधिपतिम्]

मरकतवलयविभूषितपाटलकोमलकरयुगसीमम् ।
वरतापिञ्छस्तबकालंकृतपल्लवशरमिव कामम् ॥ ७ ॥
[मधुराधिपतिम्]

निटिलविराजितकाश्मीरतिलकममितकुतूहलसान्द्रम् ।
हालास्यपुरीसौधशृङ्गमणिरुचिरञ्जितमिव चन्द्रम् ॥८॥
[मधुराधिपतिम्]

इति द्वाविंशाष्टपदी ॥

दरस्मेरापाङ्गस्फुरितमृदुशोणाधरदलं
चलत्कर्णोत्तंसं कुसुमशयनोपान्तगमने ।

तदानीं मीनाक्ष्याः पतिसमरसालोककुतुका-
दुदीतो रोमाञ्चः स्मरसमररङ्काकवचितः ॥ ६ ॥

लीलाशुकं प्रियतमस्य करे विधातुं
सव्रीडसस्मितससाध्वसमुद्यतायाः ।
तस्या मनोभवविलासवशंवदाया
आलीजनैरुपगता बहिरेव वृत्तिः ॥ ७ ॥

तदनु विजने केलीकुञ्जे सपल्लवमल्लिका-
कुवलयदलाकल्पे तल्पे तरङ्गितवीक्षणाम् ।
सरसललितप्रेमस्थेमप्रपञ्चनकातरा-
मनुकूलनवव्रीडां कान्तां जगाद जगत्पतिः ॥ ८ ॥

त्रयोविंशाष्टपदी ।

नादनामक्रियारागेण गीयते । आदितालः ।

ललिते सपदि सदाशिवम् ।
समरसमनुभव कातरम् ॥ [ध्रुवम्]

प्रविश यवनिकां निविश ममाङ्के रम्भोरु प्रियसारे ।
मामिव पाणिस्पर्शविलोलं तव शुकमनुवद धीरे ॥ १ ॥
[ललिते]

विसृज विशृङ्खलरतिगतवैभवविरसविलज्जितभेदम् ।
विदलितशेषनिचोलमिवार्पितगुरुकुचसंधिविषादम् ॥
[ललिते]

मर्दनचञ्चलनखकिरणैरवलोकय कुचतटरागम् ।
मदनमदद्विपकुम्भविजृम्भितमिव सिन्दूरपरागम् ॥
[ललिते]

विनमितवेणिकमुन्नमिताननमधरास्वादविशङ्कम् ।
न गमय नखमुखघातमिमं सखि पुनरिव विरहातङ्कम् ॥
[ललिते]

मृदुलभुजान्तरवलयितकंधरबहुलितरागमपारे ।
मामालिङ्ग्य सुमाशुगतप्तं स्नपय सुखामृतसारे ॥ ५ ॥
[ललिते]

रूपविलोकनवचनाकर्णनवदनास्वादसरूपम् ।
अनुरञ्जय मामतनुपराजितमभिमुखसरसालापम् ॥६॥
[ललिते]

अकृतश्रुतिपथलङ्घनमिव तव नयनाकर्णविलासम् ।
अमृतविलङ्घनभीरुमिवाञ्चसि मुहुरधरावधिहासम् ॥
[ललिते]

समरतिपरवशसंजीवनमिव मलयसमीरकुमारम् ।
अनुरतमणितविलासैरनुनय नवहालास्यविहारम् ॥
[ललिते]

इति त्रयोविंशाष्टपदी ॥

आशास्यं मम पूरयेति सरसं संप्रार्थितायास्तदा
वक्तुं किंचिदुदञ्चितेऽधरदले मन्दाक्षमग्नं वचः ।

अंसावर्तितमाननं पुलकितं ताटङ्करत्नप्रभा-
रम्यं गण्डतलं मुहुर्विवलिता दृष्टिः प्रियस्याधरे ॥ ९ ॥

प्रेमपूरपरीवाहकटाक्षाश्विष्कृताशयः ।
शंकरः प्राह मीनाक्षीं साकूतं रन्तुमिच्छया ॥ १० ॥

चतुर्विंशाष्टपदी ।

नादरामक्रियारागेण गीयते । त्र्यस्र एकतालः ।

कलयाधुना मदनाहवं मीनाक्षि नयनोत्सवम् ।
(ध्रुवम)

सरसदृगञ्चलभल्लपुरस्कृतनखार्धचन्द्रप्रहरे ।
विलसति निष्क्रममाणमनोभवकुञ्जरकुम्भकुचान्तरे ॥
[कलय]

शुकपिककोकिलचन्दिरमारुतमधुमाधवपरिवारे ।
दिशि दिशि सज्जितमधुरशरासनसुमशरविविधविहारे
(कलय)

मणितविजृम्भितकाहलिकलकलरवमुखरे रत्यगारे ।
मणिरशनाकृतजयघण्टाध्वनिमिश्रितहंसकरणितभरे ॥
(कलय)

नवनवविकसितरोमाञ्चकवचिततडिदुपमानशरीरे ।
वशयति मामवशं रतिसाहसतत्त्वनिरूपणसुन्दरे ॥४॥
(कलय)

अविरलसंगतसूनशराञ्चितसरसरसालकिसाले ।
विरहिमनोगतमर्मनिकृन्तनक्रकचधुरंधरशीले ॥ ५ ॥
(कलय)

दृढपरिरम्भणचुम्बनताडनकारितघर्मजशीकरे ।
मधुरिमभरितशरासविलासकन्दलितास्यनिशाकरे ॥
(कलय)

मलयसमीरणचञ्चलकुन्तलमधुपावृतमुखपङ्कजे ।
त्रिजगदहंकृतिजलनिधिशोषणमण्डनमण्डितकुम्भजे ॥
(कलय)

विजयरमाप्रथमागममङ्गलवाद्यकवादनसंभ्रमे।
नवरसभरितविलाससमेधितनवहालस्यगृहोत्तमे ॥८॥
(कलय)

इति चतुर्विंशाष्टपदी ।

प्रत्यङ्गं स्पृशतः करौ नियमितौ यद्बाहुमूले तया
स्थानादुच्चलतो यदूरुघटनं श्रोणीतटेनाहतम् ।
वक्षोजातवलीतरङ्गजघनाभोगश्रियं पश्यतो
दृष्टोऽयं मधुराधरोऽस्य तदिदं शृङ्गारवीरायितम् ॥

तत्तद्भावकलाविलासकतया कामः कृतार्थस्तयो-
रुन्मृष्टश्रमवारिशीकरतया धन्योऽस्तु मन्दानिलः ।

दत्तान्योन्यजयश्रियोः समरतिप्रोत्साहनप्रौढयो-
गौरीशंकरमौलिचन्द्रकलयोर्भाग्यं तदन्यादृशम् ॥

इति श्रीमत्परमशिवातिवादिमूर्धन्यस्य सदाशिवदीक्षितस्य कृतिषु
चतुःषष्टिलीलासंग्रहे गीतसुन्दरे षष्ठः सर्गः ॥

॥ समाप्तं गीतसुन्दरम् ॥

॥ शिवार्पणमस्तु ॥

SRI VIDYAPEETHA LIBRARY, TIRUPATI
12368
015.1
N27
VERIFIED 1985

